ज्योतिर्ग्रन्थविशेषः । होरा । इति शब्दरत्नावली ॥ (केरलज्योतिर्विद्यायां सङ्केतविशेषो दिङ्मात्रं प्रदर्श्यते गर्गसंहितायां यथा,—
"वर्गवर्णप्रमाणाञ्च सस्वरं ताडितं मिथः ।
पिण्डसञ्ज्ञा भवेत्तस्य यथामार्गेस्तु कल्पना" ॥
अस्यार्थः अ क च ट त प य श इत्यष्टौ वर्गा एतैरेव प्रश्नादयो यथायथं साङ्केतिकक्रममाश्रित्य निरूप्यन्ते ॥ केरलदेशोद्भवा स्त्री । यथा, राजेन्द्रकर्णपूरे । ९ ।
"चौडी चूडामरणहरणः कौर्णकर्णावतंसः
कर्णाटीनां मुषितमुरली केरलीहारलीलः" ॥)

केल, ऋ दाने । गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-गत्यर्थे सकं-सेट्-ऋदित् ।) ऋ, अचिकेलत् । चालः कम्पः । चालः कैश्चिन्न मन्यते । इति दुर्गादासः ॥

केलकः, पुं, (केल् + कर्त्तरि ण्वुल् ।) खड्गधारादिनर्त्तकः । तत्पर्य्यायः । प्लवकः २ । इति त्रिकाण्डशेषः ॥

केलिः, पुं स्त्री, (केल् + इन् ।) परीहासः । तत्पर्य्यायः । द्रवः २ क्रीडा ३ लीला ४ नर्म्म ५ । इत्यमरः । १ । ७ । ३२ ॥ (नायिकालङ्कारविशेषः । यथा, एतल्लक्षणं साहित्यदर्पणे । ३ । १२२ ।
"विहारे सह कान्तेन क्रीडितं केलिरुच्यते" ॥
यथा, भ्रमराष्टके । ४ ।
"मालत्याः कुसुमेषु येन सततं केलिः कृता हेलया" ॥)

केलिः, स्त्री, (केलति सदा गच्छतीति । "सर्व्वधातुभ्य इन्" । इति इन् ।) पृथिवी । इति शब्दमाला ॥

केलिकः, पुं, (केलिर्विलासः प्रयोजनमस्य इति ठन् ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (विवृतिरस्याशोकशब्दे ज्ञेया ॥)

केलिकला, स्त्री, (केलिरूपा कला । शाकपार्थिवादिवत् मध्यपदलोपिसमासः ।) सरस्वतीवीणा । इति शब्दरत्नावली ॥ (केलिः क्रीडा तस्याः कला अंशविशेषः । यथा, भ्रमराष्टके । ७ ।
"अलिरसौ नलिनीवनवल्लभः
कुमुदिनीकुलकेलिकलारसः" ॥)

केलिकिलः, पुं, (केलिना लीलया किलतीति । किल क्रीडायां + कः ।) कुष्माण्डकः । स तु शिवस्यानुचरः । नाट्ये नायकवयस्यः । तत्पर्य्यायः । विदूषकः २ वासन्तिकः ३ वैहासिकः ४ प्रहासी ५ प्रीतिदः ६ । इति हेमचन्द्रः ॥ (केलिना परीहासेन किलतीति विग्रहे वाच्यलिङ्गः । यथा, हरिवंशे ।
"स तु केलिकिलो विप्रो भेदशीलश्च नारदः" ॥)

केलिकिला, स्त्री, (केलिना विहारेण किलतीति किल् + कः । ततः टाप् ।) रतिः । सा तु कामदेवपत्नी । इति त्रिकाण्डशेषः ॥

केलिकीर्णः, पुं, (केलिनिमित्तकैः पांशुभिः कीर्णः ।) उष्ट्रः । इति हेमचन्द्रः ॥

केलिकुञ्चिका, स्त्री, (केलीनां कुञ्चिका इव । श्यालिका । इति त्रिकाण्डशेषः । शाली इति भाषा ॥

केलिकोषः, पुं, (केलीनां रहस्यानां क्रीडापरीहासादीनां वा कोष आधार इव ।) नटः । इति शब्दरत्नावली ॥

केलिनागरः, पुं, (केलिनिपुणः प्रधानको वा नागरः ।) सम्भोगवान् । इति जटाधरः ॥

केलिमुखः, पुं, (केलिः मुखं प्रधानमत्र ।) परीहासः । इति त्रिकाण्डशेषः ॥

केलिवृक्षः, पुं, (केलिनिमित्तको वृक्षः ।) कदम्बविशेषः । इति शब्दरत्नावली ॥ केलिकदम्ब इति ख्यातः ॥

केलिसचिवः, पुं, (केलौ क्रीडाविषये सचिवः सहायः ।) नर्म्मदः । क्रीडाविषयकमन्त्री । इति शब्दमाला ॥

केव, ऋ ङ सेवने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट्-ऋदित् ।) ङ, केवते । ऋ, अचिकेवत् । इति दुर्गादासः ॥

केवर्त्तः, पुं, (के जले वर्त्तते । वृत् + अच् । अलुक् समासः ।) केवर्त्तजातिः । इति द्विरूपकोषः ॥ (एषोऽन्त्यजशूद्रः । यथा, ब्रह्मवैवर्त्तपुराणे ।
"रजकश्चर्म्मकारश्च नटो वरुड एव च ।
केवर्त्तो मेदभिल्लश्च षडेते अन्त्यजाः स्मृताः" ॥)

केवलं, क्ली, (केव ङ सेवने + वृषादित्वात् कलच् । यद्वा, के शिरसि मूर्द्धावच्छेदे वलयति । वल् + अच् । अलुक् समासः ।) निर्णीतम् । इत्यमरमेदिनीकरौ ॥ ज्ञानभेदः । इति विश्वो हेमचन्द्रश्च ॥ (साङ्ख्यकारिकायां यथा,—"अविपर्य्ययात् विशुद्धं केवलमुत्पद्यते ज्ञानम्" ॥)
शुद्धम् । (यथा, रघौ २ । ६३ ।
"न केवलानां पयसां प्रसूति-
मवेहि मां कामदुघां प्रसन्नाम्" ॥)
कृत्स्नम् । (यथा, रघुवंशे १० । २९ ।
"केवलं स्मरणेनैव पुनासि पुरुषं यतः ।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि" ॥)
असहायः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (अद्वितीयः । यथा, कुमारे ५ । ८३ ।
"न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक्" ॥)

केवलः, पुं, कुहनः । इति मेदिनी । (कुम्भकविशेषः । यथा, हठयोगदीपिकायाम् । २ । ७१ ।
"प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः ।
सहितः केवलश्चेति कुम्भको द्विविधो मतः" ॥)

केवलः, त्रि, एकः । (यथा, रघुवंशे । ११ । १९ ।
"वाणभिन्नहृदया निपेतुषी
सा स्वकाननभुवं न केवलाम् ।
विष्टपत्रयपराजयस्थिरां
रावणश्रियमपि व्यकम्पयत्" ॥)
कृत्स्नः । इत्यमरमेदिनीकरौ । (यथा, रघुः १० । २९ ।
"केवलं स्मरणेनैव पुनासि पुरुषं यतः ।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि" ॥)

केवलज्ञानी, [न्] पुं, (केवलं शुद्धं ज्ञानं अस्यास्तीति । इनिः ।) भूतार्हद्विशेषः । इति हेमचन्द्रः ॥

केवलद्वयं, क्ली, (केवलं द्वयम् ।) मरिचम् । इति शब्दचन्द्रिका ॥

केवली, स्त्री, (केवल + ङीष् ।) ज्ञानभेदः । इति मेदिनी । ग्रन्थविशेषः । इति हेमचन्द्रः ॥

केवली, [न्] पुं, (केवलं शुद्धं ज्ञानमस्यास्तीति । इनिः ।) जैनविशेषः । इति हलायुधः ॥

केविका, स्त्री, (केव गतिचालनयोः + ण्वुल् + टाप् अत इत्वम् ।) पुष्पविशेषः । केवेर इति भाषा कोकणे प्रसिद्धा । तत्पर्य्यायः । कविका २ केवी ३ भृङ्गारिः ४ नृपवल्लभा ५ भृङ्गमारी ६ महागन्धा ७ राजकन्या ८ अलिवाहिनी ९ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । दाहपित्तश्रमवातश्लेष्मरोगपित्तच्छर्द्दिविनाशित्वञ्च । इति राजनिर्घण्टः ॥

केशः, पुं, (के मस्तके शेते । शी + अच् । अलुक् समासः ।) मज्जजातोपधातुविशेषः । चुल इति भाषा । स तु गर्भस्थबालकस्य अष्टाभिर्मासैर्जायते । इति सुखबोधः । (केशादयस्तु पितृतो जायन्ते । यथा, सुश्रुते शारीरस्थाने तृतीयेऽध्याये । "गर्भस्य केशश्मश्रुलोमास्थिनखदन्तशिरास्नायुधमनीरेतःप्रभृतीनि स्थिराणि पितृजानि" ॥ भावप्रकाशे च ।
"केशाः श्मश्रु च लोमानि नखा दन्ताः शिरास्तथा ।
धमन्यः स्नायवः शुक्रमेतानि पितृजानि हि" ॥)
तत्पर्य्यायः । चिकुरः २ कुन्तलः ३ वालः ४ कचः ५ शिरोरुहः ६ । इत्यमरः । २ । ६ । ९५ ॥ शिरसिजः ७ मूर्द्धजः ८ अस्रः ९ वृजिनः १० । इति जटाधरः ॥ (रोगविशेषेणास्योत्पाटनानन्तरमुद्गमोपायाश्च । यथा,—
"वटावरोहकेशिन्योश्चूर्णेनादित्यपाचितम् ।
गुडूचीस्वरसे तैलमभ्यङ्गाल्लोमरोहणम्" ॥
इति आदित्यपाकगुडूचीतैलम् ॥ * ॥
"मधुकेन्दीवरमूर्व्वा तिलाज्यगोक्षीरभृङ्गलेपेन ।
अचिराद्भवन्ति घनकेशा दृढमूलायतास्तथा" ॥
"चन्दनं मधुकं मूर्व्वा त्रिफला नीलमुत्पलम् ।
कान्तावटप्ररोहश्च गुडूचीविषमेव च ॥
लौहचूर्णं तथा केशी शारिवे द्वे तथैव च ।
मार्कवस्वरसेनैव तैलं मृदग्निना पचेत् ॥
शिरस्युत्पतिताः केशा जायन्ते घनकुञ्चिताः ।
दृढमूलाश्च स्निग्धाश्च तथा भ्रमरसन्निभाः ॥
नस्येनाकालपलितं निहन्यात्तैलमुत्तमम्" ॥
इति चन्दनाद्यं तैलम् ॥ * ॥
"तैलं सयष्टीमधुकैः क्षीरे धात्रीफलैः शृतम् ।
नस्ये दत्तं जनयति केशान् श्मश्रूणि चाप्यथ" ॥
पक्वावस्थापन्नस्यास्य कृष्णीकरणोपाया यथा,—
"त्रिफलाचूर्णसंयुक्तं लौहचूर्णं विनिक्षिपेत् ।
ईषत्पक्वे नारिकेले भृङ्गराजरसान्विते ॥
मासमेकन्तु निःक्षिप्य सम्यग्भूगर्भात् समुद्धरेत् ।
ततः शिरो मुण्डयित्वा लेपं दद्याद्भिषग्वरः ॥
सम्वेष्ट्य कदलीपत्रैर्मोचयेत्सप्तमे दिने ।
क्षालयेत्त्रिफलाक्वाथैः क्षीरमांसरसाशिनः ॥
कपालरञ्जनञ्चैव कृष्णीकरणमुत्तमम्" ॥
"उत्पलं पयसा सार्द्धं मासं भूमौ निधापयेत् ।
केशानां कृष्णकरणं स्नेहनञ्च विधीयते" ॥